# श्रीमद्भागवतस्य वेदात्मकत्वम्

**Dr. K. Shyamasundra**

**Associate Professor of Vyakarana, The Madras Sanskrit College, Mylapore, Chennai-600004**

## उपोद्घातः

अस्माकं सनातनधर्मस्य मूलं हि वेदः। अतः धर्माधर्मयोः स्वतन्त्रं प्रमाणमस्ति श्रुतिः। तन्मूलकतया स्मृत्याचारेतिहासपुराणादीनाम् अपि प्रामाण्यम् । प्रभुसंमितस्य वेदस्य अर्थावबोधः न सुकरः इति तदर्थबोधनार्थं स्वयं वेदविभागकर्त्रा वेदव्यासेन रचितानि विभान्ति पुराणानि वेदार्थगर्भितानि । इतिहासस्यापि लक्ष्यं तदेवेत्यतः सोऽपि वेदार्थगर्भितः ।उक्तं च "वेदः प्राचेतसादासीत् साक्षाद्रामायणात्मना"। "निगमकल्पतरोर्गलितं फलम्... ॥"[1] इत्यादि। एवञ्च वेदतात्पर्यावगमार्थम् इतिहासपुराणानां पठनम् अनिवार्यं भवति । उक्तं हि –

तेनाधीतं पुराणं स्यात्सर्वं नास्त्यत्र संशयः । यो विद्याच्चतुरो वेदान् सांगोपनिषदान् द्विजः ॥

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् । बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति [2]॥इति ।

## शोधपत्रस्य उद्देश्यम्

श्रीमद्भागवते बहवो वेदमन्त्राः संहिता-ब्राह्मण-आरण्यकादिभ्यः दृश्यन्तेऽत्र ईषत्परिवर्तनपूर्वकं स्वरूपतः, अंशतः, अर्थतश्चेत्येवं बहुधा अनूदिताः। तेभ्यः केषाञ्चिन्मन्त्राणां,

---

[1] *पद्मपुराणे उत्तरखण्डे भागवतमाहात्म्ये* - ६.८० (*श्रीमद्भागवतमहापुराणम्* गीताप्रेस, पृष्ठम् – १६)

[2] *ब्रह्माण्डपुराणम्* डॉ० के० वी० शर्मणा संशोधितम् - १.१.१७०,१७१, पत्रम् ४.

विशिष्य ऋक्संहितान्तर्गतानां संकलने यथामति यथावकाशं च मयात्र प्रयासो विधीयते। प्रयासस्यास्य किं फलम् इति चेत् , उच्यते - 'पुराणेतिहासाः केवलं स्वकपोलकल्पितकथासंग्रहरूपाः| तेषां मूलं किमपि नास्ति | अतो न तेषां कृत्याकृत्येषु प्रामाण्यम्' इत्यभिप्रयन्ति जनाः बहवः। तेषां पुराणादिषु विश्वासरहितानां, वस्तुतत्वस्य प्रकाशनेन तत्र विश्वासोत्पादनम्। विश्वासवतां तदभिवर्धनं च इति। यद्यपि पुराणानां वेदमूलकत्वं बहुत्र प्रतिपादितं तथापि मन्त्रनिर्देशपूर्वकम् 'अयं मन्त्रः अत्र अनूदितः' इति , 'एतद्वाक्यस्य अयं मन्त्रः मूलम्' इति वा सुस्पष्टं सोदाहरणं यदि ज्ञायेत तर्हि आस्तिकानां तत्र श्रद्धादराधिक्यम् अवश्यं भवेदिति धिया विहितोऽस्त्ययं प्रयासः ॥

विषयप्रस्तावः

`यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्'[3] इत्युक्तरीत्या सर्वार्थपरिबृंहितं *महाभारतं* ब्रह्मसूत्रादिकं च कृत्वापि अतृप्तैः व्यासाचार्यैः नारदोपदेशेन अन्ते आरचितम् इदं *श्रीमद्भागवतम्* इत्यतः सकलवेदोपनिषत्सारोऽयम् इति निश्चप्रचम्। तदुक्तं –

**अर्थोऽयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः। गायत्रीभाष्यरूपोऽसौ वेदार्थपरिबृंहितः ॥[4] इति |**

**वेदोपनिषदां साराज्जाता भागवती कथा ।[5]इति च |**

भगवद्भक्त्या सह ज्ञानमार्गस्य उपदेशार्थं प्रवृत्तत्वात्, मोक्षशास्त्रेऽस्मिन् *श्रीमद्भागवते*, वेदान्तवाक्यानि संनिहितानि उपलभ्येरन्नेव| यथा -

---

[3] *महाभारतम्* Edited By T. R. Krishnacharya & T. R. Vyasacharya, *आदिपर्व* १.६२.२६. पृष्ठम् – १०१

[4] *गरुडपुराणम्* इति wordpress.com (accessed on 2.11.2023)

[5] *पद्मपुराणे* उत्तरखण्डे भागवतमाहात्म्ये -२-६७ (*श्रीमद्भागवतमहापुराणम्* गीताप्रेस, पृष्ठम् – ५)

ईशा वास्यमिदँ सर्वं यत्किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद् धनम्॥[6] इति

ईशावास्योपनिषद्वाक्यम् । इदमेव *श्रीमद्भागवते* यथा –

आत्मावास्यमिदं विश्वं यत् किञ्चिज्जगत्यां जगत् | तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद् धनम् ॥[7]

इत्यादि । स्वरूपतोऽनुवादोऽयम् |

लोके यत्किञ्चित् जगत् = भूतजातं विश्वं = सर्वं, आत्मना = ईश्वरेण आवास्यं = स्वसत्ताचैतन्याभ्यां संव्याप्यं वर्तते| अतः तेनैव ईश्वरेण यत्किञ्चित् त्यक्तं दत्तं धनं तेनैव भुञ्जीथाः भोगान्भुङ्क्ष्व। यद्वा तेन हेतुना त्यक्तेन ईश्वरार्पणेनैव भुञ्जीथाः न स्वार्थम् । कस्यस्वित् कस्यचिदपि धनं मा गृधः माभिकाङ्क्षीः । यद्वा कस्यस्विदिति अहो कस्यान्यस्य धनमस्ति यतो धनाकाङ्क्षा क्रियेत इत्यर्थः । एतदतिरिच्यापि अत्र बहवो वेदमन्त्राः बहुधा अनूदिताः सन्ति । तेषु स्थालीपुलाकन्यायेन केचन अत्र प्रदर्श्यन्ते ।

## अग्निस्तुतिः

कदाचित् युद्धार्थं स्वर्गलोकं गतस्य महाबलेः पराक्रमं शक्तिं च दृष्ट्वा भीतिग्रस्ताः इन्द्रादयो देवाः देवलोकं त्यक्त्वा धृतरूपान्तराः क्वचित् निलीनाः आसन् । पुत्राणाम् अदर्शनेन खिन्नया अदित्या प्रार्थितः कश्यपः तां पुत्रैश्वर्यप्राप्त्युपायं फाल्गुनमासस्य शुक्लपक्षे, द्वादशाहम् अनुष्ठेयं पयोव्रतम् उपदिदेश। तत्र अष्टमस्कन्धे–

---

[6] श्रीशङ्कराचार्यग्रन्थावली - *ईशावास्यम्* - १.१ पृष्ठम् – १.

[7] *श्रीमद्भागवतम्* गीताप्रेस,– ८-१-१०. पृष्ठम् – ३२०.

नमस्तुभ्यं भगवते पुरुषाय महीयसे । सर्वभूतनिवासाय वासुदेवाय साक्षिणे ॥

इत्येवमादयो बहवः भगवदाराधनोपयुक्ताः श्लोकमन्त्राः उपादिश्यन्त। तत्रैकः श्लोकमन्त्रः –

" नमो द्विशीर्ष्णे त्रिपदे चतुःशृङ्गाय तन्तवे[8] । सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नमः ॥" [9] इति ।

श्लोकोऽयं *ऋग्वेदस्थं* "चत्वारि शृङ्गा." इति मन्त्रमनुकरोति। तथाहि मन्त्रः –

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।

त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आ विवेश ॥[10] इति ।

मन्त्रोऽयं यागेषु आज्यशस्त्रमन्त्रत्वेन विहिते "समुद्रादूर्मिः.." इति सूक्ते अन्तर्भवति । सूक्तमिदम् अग्निः, सूर्यः,

आपः, गौः, घृतम् इति पञ्चदेवताकम् । अतः अस्यापि मन्त्रस्य पञ्चदेवताकत्वात् पञ्चधा अर्थः वर्णनीयः, तथापि

निरुक्तानुसारं यज्ञपरतया, तथा सूर्यपरतया च अर्थो वर्णितः सायणाचार्यैः। अत्र अग्निः विलक्षणवृषभत्वेन उपवर्ण्यते | यथा - 'अस्य यज्ञात्मकस्य अग्नेः, चत्वारि शृङ्गाः= चत्वारो वेदाः शृङ्गस्थानीयाः। त्रयः अस्य पादाः= प्रातःसवनम् , माध्यन्दिनसवनम् , तृतीयसवनम्[11], इति त्रीणि सवनानि अस्य पादाः। प्रवृत्तिसाधनत्वात् पादाः इत्युच्यन्ते। द्वे शीर्षे= ब्रह्मौदनम्[12] , प्रवर्ग्यश्च[13] । [अत्र

---

[8] तनु विस्तारे इति धातोः औणादिकः तुन्-प्रत्ययः। "सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्" उणा-६९.

[9] *श्रीमद्भागवतम्* गीताप्रेस – ८.१६. श्लो.२९,३१. पृष्ठम् – ३४७.

[10] ऋग्वेदसंहिता ४.५८.३.

[11] ज्योतिष्टोमे इदं सवनत्रयं भवति यत्र सोमाभिषवः, सोमग्रहणं, सोमयागः, तत्पानम्, स्तोत्रशस्त्रादिकं च भवति। प्रधानयागोऽयम् । सुत्याहः इत्युच्यते इदम् दिनम् ।

[12] आधानाङ्गतया अग्निविशेषे ओदननिष्पादनम् । तदोदनं चतुर्भिः ऋत्विग्भिः भक्ष्यते ।

(१)प्रायणीय[14]- (२) उदयनीय-इष्टी निरुक्ते उक्ते ।] इष्टि-सोम[15]-प्राधान्येन इदमुक्तम् । सप्त हस्तासः = गायत्र्युष्णिगनुष्टुप्-बृहती-पङ्क्ति-त्रिष्टुप्-जगत्याख्यानि सप्त छन्दांसि सप्त हस्ताः । हस्तः अनुष्ठानस्य मुख्यं साधनम् । छन्दांस्यपि देवताप्रीणनस्य मुख्यसाधनमिति हस्तव्यवहारः[16]। त्रिधा बद्धः= मन्त्र-ब्राह्मण-कल्पैः त्रिप्रकारं बद्धः। बन्धनं चास्य तन्निष्पाद्यत्वम् । वृषभः = फलानां वर्षिता । रोरवीति= भृशं शब्दायते , ऋग्यजुस्सामोक्थैः शस्त्र-याग-स्तुतिरूपैः होत्राद्युत्पादितैः ध्वनिभिः असौ रौति । एवं महोदेवः मर्त्यान् आविवेश । मर्त्यैः यजमानैः निष्पाद्यत्वात् प्रवेशः

उपचर्यते ।

पक्षान्तरे [17]– होत्रध्वर्यु-उद्गातृ-ब्रह्माणः चत्वारोऽस्य कर्मणः शृङ्गाणि । प्रातःसवनादयः त्रयः पादाः। पत्नीयजमानौ द्वे शीर्षे । गायत्र्यादीनि (गायत्र्युष्णिगनुष्टुप्-बृहती-पङ्क्ति-त्रिष्टुप्-जगत्यः) सप्त छन्दांसि हस्ताः। ऋग्वेदादिभिः त्रिभिः वेदैः त्रिधा बन्धनम् । कामान् वर्षति इति वृषभः। रोरवीति= स्तोत्रशस्त्रादिशब्दान् पुनःपुनः करोति। महोदेवः सोऽयं प्रौढो यज्ञरूपो देवः मर्त्यान् आविवेश इति मनुष्या एव अत्र अधिकारिणः।

*श्रीमद्भागवते*ऽपि ‘यज्ञो वै विष्णुः’ इत्यादिश्रुत्या, व्याख्यातृभिः श्रीधरस्वाम्यादिभिः ‘विष्णुस्तु यज्ञरूपेण स्तूयतेऽनेन तत्त्वतः’ इत्येवं विष्णोः यज्ञरूपत्वाङ्गीकारेण, एतन्मन्त्रोदाहरणपूर्वकम् उक्तश्लोकस्य अयमेव अर्थः न्यरूपि । एवञ्च उक्तरूपयज्ञमूर्तये (तनोति फलमिति तन्तुः, तस्मै)

---

13 प्रतप्ते घृते गोः, अजायाश्च यत् पयः तत्प्रक्षेपात्मकं कर्म। अनेनैव कर्मणा विच्छिन्नशिरसः यज्ञपुरुषस्य (शिरसः) पुनःसंयोजनम्, उत्पत्तिर्वा भवति इति तात्पर्यम् ।

14 (१) सोमयागारम्भे क्रियमाणा इष्टिः।(२) सोमयागान्ते क्रियमाणा इष्टिः।

15 यागः त्रिविधः- इष्टिः=व्रीहियवपुरोडाशाद्यौषधद्रव्यकयागः,सोमयागः, पशुयागश्चेति । [ओषध्यः फलपाकान्ता इत्यमरः]

16 यागे बहिष्पवमानादिषु तत्तच्छन्दोविशेषैः मन्त्रपठनम्, गानं च विहितम् ।

17 ऋग्वेदसंहिता , पृष्ठम् – ७ (ऋग्वेदसायणभाष्यभूमिकायाम्)

वाञ्छितफलदाय, (त्रय्यां विद्यायाम् आत्मा यस्य तस्मै=) वेदत्रयीप्रोक्ताय श्रीविष्णवे नमः इति श्लोकार्थः। श्रीविष्णोः यज्ञरूपत्वं तृतीयस्कन्धे वराहावतारनिरूपणावसरे विस्तरेण प्रतिपादितमेव ॥ आश्वलायनाग्निमुखप्रयोगे अग्निध्यानश्लोकः कश्चन पठ्यते एतन्मूलकः । यथा –

सप्तहस्तश्चतुश्शृङ्गः सप्तजिह्वो द्विशीर्षकः । त्रिपात् प्रसन्नवदनः सुखासीनः शुचिस्मितः ॥ इति।

वैयाकरणैस्तु मन्त्रोऽयं शब्दपरतया व्याख्यातः । तथाहि *महाभाष्यम्* - चत्वारि शृङ्गाणि= चत्वारि पदजातानि
नामाख्यातोपसर्गनिपाताश्च । त्रयः अस्य पादाः= त्रयः कालाः भूतभविष्यद्वर्तमानाः । द्वे शीर्षे =द्वौ शब्दात्मानौ नित्यः कार्यश्च । सप्त हस्तासः अस्य = सप्त विभक्तयः अस्य सप्त हस्ताः । त्रिधा बद्धः त्रिषु स्थानेषु बद्धः उरसि कण्ठे शिरसि इति । वृषभः[18] वर्षणात् । रोरवीति शब्दं करोति ।(रौतिः शब्दकर्मा ।) महोदेवः मर्त्यानाविवेश इति । महान्देवः शब्दः। मर्त्याः मरणधर्माणः मनुष्याः । तानाविवेश इति । अस्यापि व्याख्यानस्य विष्णौ शब्दब्रह्मात्मकत्वोपपादनेन सङ्गतिः प्रदर्शिता श्रीमद्भागवतस्य भगवत्प्रसादाचार्यकृतायां भक्तमनोरञ्जनीव्याख्यायाम्।

## कर्मकाण्डस्य प्रादुर्भावः

प्रकृतस्यास्य यज्ञस्य कर्मकाण्डस्य , तन्मूलभूतत्रेताग्नेश्च प्रादुर्भावः त्रेतायुगस्य प्रारम्भे पुरूरवस एव जातः इति *भागवते* उर्वशीपुरूरवसोः कथान्ते द्वित्रैः श्लोकैः सम्यक् न्यरूपि –

एक एव पुरा वेदः प्रणवः सर्ववाङ्मयः | देवो नारायणो नान्य एकोऽग्निर्वर्ण एव च॥

---

[18] वृषु सेचने इत्यस्माद्धातोः "ऋषिवृषिभ्यां कित्" (उण्-४०३)इति औणादिकः अभच्-प्रत्ययः।

पुरूरवस एवासीत्त्रयी त्रेतामुखे नृप। अग्निना प्रजया राजा लोकं गान्धर्वमेयिवान् ॥ इति ।[19]

कृतयुगे प्रायः सर्वेऽपि जनाः, सत्वप्रधानाः ध्याननिष्ठाः आसन् । रजःप्रधाने तु त्रेतायुगे, वेदादिविभागपूर्वकं पुरूरवसः कर्ममार्गः प्रकटो जातः । ततः उर्वश्या विरहितो राजा पुरूरवाः, अरणिमन्थनेन अग्निं पुत्रकल्पम् उत्पाद्य, तस्मिन् गार्हपत्यः, आहवनीयः, दक्षिणाग्निः, इति त्रिवृत्त्वं प्रकल्प्य , तत्र यागं कृत्वा उर्वश्याः आवासस्थानम् गन्धर्वलोकम् अवाप इत्यर्थः।

उर्वशीपुरूरवसोः कथा

कथायामस्याम् उपलभ्यन्ते ऋङ्मन्त्राः । तथाहि- नवमस्कन्धे उर्वशीपुरूरवसोः प्रणयकथा उपवर्णिता ।

मित्रावरुणयोः शापात् मनुष्यभावमापन्ना उर्वशी भुवमागता, चन्द्रवंशीयस्य राज्ञः पुरूरवसः कन्दर्पसदृशं रूपं दृष्ट्वा तस्मिन् सञ्जातकामा तेन सह सुखम् उवास । गच्छति काले कदाचित् उर्वशी पूर्वकृतसमयभङ्गकारणेन पुरूरवसं त्यक्त्वा विनिर्ययौ। पुरूरवाः तद्विरहात् खिन्नः उन्मत्तवत् इतस्ततो भ्रमन् कुरुक्षेत्रे सरस्वतीतीरे तां ददर्श । तत्र तयोः सुदीर्घः संवादः प्रावर्तत । तत्रैते श्लोकाः-

अहो जाये तिष्ठ तिष्ठ घोरे न त्यक्तुमर्हसि । मां त्वमद्याप्यनिर्वृत्य वचांसि कृणवावहै ॥

सुदेहोऽयं पतत्यत्र देवि दूरं हृतस्त्वया । खादन्त्येनं वृका गृध्रास्त्वत्प्रसादस्य नास्पदम् ॥

मा मृथाः पुरुषोऽसि त्वं मा स्म त्वाद्युर्वृका इमे ।क्वापि सख्यं न वै स्त्रीणां वृकाणां हृदयं यथा [20]॥इति ।

[19] *श्रीमद्भागवतम्* गीताप्रेस – ९.१४.श्लो. ४८,४९. पृष्ठम् – ३८३.

[20] *श्रीमद्भागवतम्* गीताप्रेस - ९.१४.श्लो. ३४-३६. पृष्ठम् – ३८३.

तत्र 'अहो जाये' इत्यादिश्लोकद्वयम् पुरूरवसो वचनम् | अयमर्थः – हे घोरे जाये तिष्ठ तिष्ठ, अद्यापि त्वद्गतसुखम् अगमयित्वा मां त्यक्तुं नार्हसि । यदि तावत् त्यक्ष्यसि तदपि क्षणं यावत् वचांसि, रहःसंलापान् वा करवावहै । यद्यसम्भाष्य गमिष्यसि तर्हि हेतुभूतया त्वया दूरं नीतः मेऽयं सुदेहः अत्रैव पतेत् । वृकाः गृध्राश्च तं देहं खादेयुः। तच्च त्वत्सन्तोषस्य आस्पदं न भवेत् । अतो मया सह सम्भाषणं वा कुरु इति।

तत्र उर्वश्याः प्रतिवचनं 'मा मृथाः..' इति श्लोकः । हे पुरूरवः मा म्रियस्व । त्वं पुरुषोऽसि, अतः धैर्यम् आवह । इमे प्रसिद्धाः वृकाः इन्द्रियाणि वा त्वां मा स्म अद्युः । इन्द्रियवशो मा भव । स्त्रीणां क्वापि सख्यं नास्ति ।वृकाणां हृदयमिव स्त्रीणामपि हृदयं क्रूरं भवति । अतः स्त्र्यर्थं त्वं स्वजीवत्यागं मा कुरु इति तदर्थः ।

*ऋग्वेदे* दशममण्डले[21] एकं सम्पूर्णं सूक्तम् उर्वशीपुरूरवसोः संवादरूपम् उपलभ्यते । तत्र सन्त्यष्टादश मन्त्राः । तेभ्यः त्रयो मन्त्राः दृश्यन्ते अत्र अनूदिताः । वेदे संवादः केवलम् उपलभ्यते न सम्पूर्णकथा । अतः तस्य सङ्गतिं विवरणं च चकार व्यासाचार्यः अनया कथया इति भाति । मन्ये अत एव मन्त्रानुपूर्वी प्रायः तथैव गृहीता इति । उर्वशी-पुरूरवसोः कथां *शतपथब्राह्मणे, यजुर्वेदे (काठके), वायुपुराणे, विष्णुपुराणे, बृहद्देवतायाम्, कथासरित्सागरे, महाभारते, श्रीमद्भागवते* इत्येवं बहुत्र द्रष्टुं शक्नुमः। सायणाचार्यैरपि एतत्सूक्तारम्भे अनूदितेयं कथा । तथा च मन्त्राः –

हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै नु ।
न नौ मन्त्रा अनुदितास एते मयस्करन् परतरे चनाहन् ॥

---

[21] ऋग्वेदसंहिता - १०-९५

सुदेवो अद्य प्रपतेदनावृत्परावतं परमां गन्तवा उ ।

अधा शयीत निर्ऋतेरुपस्थेऽधैनं वृका रभसासो अद्युः ॥[22] इति।

इदं मन्त्रद्वयं पुरूरवसो वचनम् । पुरूरवाः उर्वशीं पश्यन् वदति – हये = हे , घोरे = अस्माकं दुःखजनकत्वात् घोरकारिणि जाये , मनसा=अस्मदुपरि अनुरागवता मनसा युक्ता सती तिष्ठ = क्षणमात्रं संनिधावेव निवस । मिश्राणि वचांसि नु कृणवावहै = उक्तिप्रत्युक्तिरूपं सम्भाषणम् अद्य क्षिप्रं वा करवावहै । यतो हि नौ एते मन्त्राः अनुदितासः =आवयोः विवक्षिताः रहस्यार्थाः अव्याह्रियमाणाः, परस्परम् असम्भाष्यमाणाः गुम्फिताः सन्तः, परतरे चन[23] अहन् = अनेकेषु दिवसेषु चरमेऽप्यहनि । मयः = सुखं, न करन् = कुर्वन्ति । अतः सम्भाषणं करवावहै इति प्रथममन्त्रस्य अर्थः ।

किञ्च तत्र वेदे प्राक्तने त्रयोदशे मन्त्रे - 'मम गर्भे निहितं त्वत्पुत्रम् बहिरागमने तुभ्यं प्रहिणोमि । परन्तु त्वं मां नैव प्राप्नोषि । अतः प्रलापं त्यक्त्वा गृहं गच्छ' इत्युक्ताम् उर्वशीं प्रतिवदति परिदूनः पुरूरवाः ' सुदेव..' इति द्वितीयमन्त्रेण। सुदेवः= त्वया सह सुक्रीडः पतिः , अद्य प्रपतेत् = अत्र प्रपततु । अथवा अनावृत् परमां परावतं गन्तवै = पुनरागमनरहितः सन् , दूरादपि दूरदेशं गन्तुम्, महाप्रस्थानगमनं कुर्यात् । अध= अथवा यत्रकुत्रापि गन्तुम् असमर्थः , निरृतेः = पृथिव्याः, उपस्थे शयीत = शयनम् कुर्यात् । यद्वा निरृतिः पापदेवता । तस्याः उपस्थे = उत्सङ्गे सन्निधौ म्रियताम् । अध= अथवा। एनं रभसासः वृकाः अद्युः = वेगवन्तः आरण्याः श्वानः भक्षयन्तु इत्यर्थः।

तत्र उर्वशी प्राह –

पुरूरवो मा मृथा मा प्र पप्तो मा त्वा वृकासो अशिवास उ क्षन् ।

---

[22] ऋग्वेदसंहिता १०.९५. मन्त्रः - १ , १४.

[23] चनेति निपातसमुदायः चार्थे ।

न वै स्त्रैणा॑नि स॒ख्यानि॑ सन्ति सालावृ॒काणा॒ं हृद॑यान्ये॒ता ॥ इति। [24]

हे पुरूरवः! त्वं मा मृथाः= म्रियस्व। तथा मा प्रपप्तः = अत्रैव पतनं मा कार्षीः । तथा, त्वा अशिवासः वृकासः मा उ क्षन् = त्वाम् अशुभाः वृकाः मैव अद्युः। अस्मदुपरि आग्रहं मा कार्षीः । कुत इति चेत् स्त्रैणानि = स्त्रीणां सख्यानि न खलु शाश्वतानि सन्ति । एताः =एतानि सख्यानि , सालावृकाणां हृदयानि = तेषां हृदयानि यथा वत्सादीनामपि विश्वासापन्नानां घातुकानि , तद्वत् भवन्ति । अतः स्त्र्यर्थं त्वं स्वजीवत्यागं मा कुरु इत्यर्थः । एवञ्च अत्र मन्त्राणां श्लोकानां च आनुपूर्वी , अर्थश्च प्रायः समान एव इति स्पष्टम् ।

## शकुनशास्त्रम्

वैदिकवाङ्मये पक्षिणामपि उत्तमं स्थानं प्रदत्तमस्ति । तत्र शकुनपक्षिणः, केचन प्राणिनश्च शुभाशुभसूचनाय देवताभिः प्रेष्यन्ते इति प्रसिद्धिः । कपिञ्जलपक्षी शुभसूचकः इति तस्य स्तोत्रमपि क्रियते ऋग्वेदे द्वितीयमण्डलान्ते । कपोतः अशुभसूचकत्वेन यमदूतत्वेन च प्रतिपादितः । बृहद्देवतायां काचन कथा – पूर्वं कपोतापराख्यः नैरृतनामा कश्चन ऋषिः आसीत्। सः बहुकालम् अरण्ये तपश्चचार । कदाचित् कपोतः कश्चन आगतः तस्य अग्निकुण्डे पादन्यासं कृत्वा अगच्छत्। कपोतस्यागमनं दुश्शकुनमिति ज्ञातवान् स ऋषिः कपोतं हितवचनैः संस्तुत्य दोषपरिहारार्थं “देवाः कपोत..” इति सूक्तं जजाप इति । उक्तं च आश्वलायनगृह्यसूत्रे- “ कपोतश्चेदगारमुपहन्यादनुपतेद्वा देवाः कपोत इति प्रत्यृचं जुहुयाज्जपेद्वा[25] इति। सूक्तमिदं पञ्चर्चम् ऋग्वेदे दशममण्डले[26] विद्यते ।तत्रत्यं मन्त्रद्वयं यथा –

---

[24] *ऋग्वेदसंहिता* -१०.९५.१५

[25] *आश्वलायनगृह्यसूत्रम्* - ३.७.७ (आनन्दाश्रमसंस्कृतग्रन्थावलिः -१०५) पृष्ठम् – ९४.

[26] *ऋग्वेदसंहिता* -१०.१६५

देवाः कपोत इषितो यदिच्छन् दूतो निर्ऋत्या इदमाजगाम ।
तस्मा अर्चाम कृणवाम निष्कृतिं शं नो अस्तु द्विपदे शं चतुष्पदे ॥

यदुलूको वदति मोघमेतद्यत्कपोतः पदमग्नौ कृणोति ।
यस्य दूतः प्रहित एष एतत्तस्मै यमाय नमो अस्तु मृत्यवे ॥[27] इति ।

हे देवाः! इषितः =प्राप्तः , निर्ऋत्याः = पापदेवतायाः दूतः कपोतः, यत् बाधनम् इच्छन् इदम् अस्मदीयं गृहम् आजगाम, तस्मै बाधनाय = तद्बाधननिवृत्त्यर्थम् अर्चाम =युष्मान् हविषा पूजयाम |ततः निष्कृतिं = कपोतप्रवेशजन्यस्य दोषस्य परिहृतिं कृणवाम =अनेन हविर्दानेन करवाम |अतः नः= अस्माकं, द्विपदे =पुत्राय, चतुष्पदे =गवाश्वप्रभृतये च, शं = सुखम् अस्तु ,|

उलूकः =घूकसंज्ञकः पक्षी, यत् अशोभनं वदति = आत्मीयेन शब्देन सूचयति, तदेतत् मोघं =निष्फलमस्तु | कपोतः च अग्नौ =अग्निमति गृहमध्ये यत् पदं करोति तदपि मोघं = निर्वीर्यमस्तु |प्रहितः = प्रेषितः एष कपोतः यस्य स्वामिनः दूतः भवति, तस्मै मृत्यवे= मारयित्रे यमाय , एतत् प्रणामोऽस्तु [28] इत्यर्थः । एवञ्च पूर्वोक्तशकुनशास्त्रस्य , कथायाश्च इयमस्ति श्रुतिः मूलम् ।

स्मर्यते चेदं शकुनशास्त्रं युधिष्ठिरेण *श्रीमद्भागवते* प्रथमस्कन्धे । कदाचित् अर्जुनः बन्धुजनदिदृक्षया श्रीकृष्णस्य वृत्तान्तं ज्ञातुं च द्वारकां जगाम । सः भगवतः अवतारसमाप्तिकालः आसीत् । द्वारकां गतः अर्जुनः बहुमासानन्तरमपि नायातः| तदा तस्य प्रत्यागमने विलम्बस्य कारणं चिन्तयन् युधिष्ठिरः श्रुतौ अशुभसूचकत्वेन प्रतिपादितान् घोररूपान् भौमान् , दिव्यान् , दैहिकांश्च उत्पातान् ददर्श । तद्वर्णनावसरे कश्चन श्लोकः -

---

[27] *ऋग्वेदसंहिता* - १०.१६५.१,४ .

[28] *सायणभाष्यम्*

मृत्युदूतः कपोतोऽयमुलूकः कम्पयन्मनः। प्रत्युलूकश्च कुह्वानैर्विश्वं वै शून्यमिच्छतः ॥ इति ।

............

मन्य एतैर्महोत्पातैर्नूनं भगवतः पदैः । अनन्यपुरुषश्रीभिर्हीना भूर्हृतसौभगा ॥[29] इति च ।

भीमसेनं प्रति युधिष्ठिरस्य वचनमिदम् | हे वृकोदर ! समीपस्थोऽयं कपोतः मृत्युदूतः=मृत्युसूचकः इति मे मनः कम्पयन्

वर्तते | उलूकः, तत्प्रतिपक्षो घूकः काको वा , तावेतौ अनिद्रौ कुह्वानैः= कुत्सितशब्दैः विश्वं शून्यं कर्तुमिच्छतः| एतैः महोत्पातैः मन्ये नूनं भूरियं भगवतः चरणकमलैः विहीना हृतसौभगा अनाथा भविष्यति इति | युधिष्ठिरे एवं चिन्तयति सति यदुपुर्याः प्रत्यागतात् अर्जुनात् श्रीकृष्णस्य देहत्यागवृत्तान्तं श्रुत्वा पाण्डवाः सर्वे दुःखाम्बुधौ निममज्जुः | तथा च सद्य एव दुश्शकुनफलं तैः अनुभूतम् | एवञ्च उक्तश्रुतिमूलकमस्ति इदं युधिष्ठिरवचनम् |

अद्वैतम्

एवमेव *ऋग्वेदे* परमात्मनः सर्वदेवतात्मत्वबोधकः सर्वैः उद्ध्रियमाणः प्रसिद्धो मन्त्रः यथा –

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।

एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः॥[30] इति |

इमम् आदित्यम् अग्निं वा एकमेव वस्तुतः सन्तं विप्राः= मेधाविनः देवतातत्त्वविदः इन्द्र–मित्र-वरुणादिनामभिः

बहुधा = नानात्वेन वदन्ति इत्यर्थः [31]।

---

[29] *श्रीमद्भागवतम्* गीताप्रेस -१.१४.१४, २१ पृष्ठम् – ४२.

[30] *ऋग्वेदसंहिता* - १.१६४.४६.

[31] *सायणभाष्यम्*

एवम् अन्योऽपि मन्त्रः एकस्य सर्वदैवतरूपत्वबोधकः-

रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय ।

इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश ॥[32] इति ।

अयमिन्द्रः(सर्वेश्वरः) स्वमाहात्म्येन अग्न्यादितत्तद्देवतास्वरूपं प्राप्नोति । तच्च प्राप्तम् अग्न्यादिदेवतास्वरूपम् , अयमग्निः, अयं विष्णुः अयं रुद्रः इत्येवम् असङ्कीर्णदर्शनाय भवति । अपि चायं स्वसङ्कल्पैः बहुविधशरीरः सन् तत्तन्नाम्ना युगपत् बहून् यजमानान् गच्छति । यतो हि अस्य रथे योजिताः सहस्राधिकाः अश्वाः सन्ति । इति मन्त्रस्यास्य एकोऽर्थः सायणाचार्यैः प्रतिपादितः । अनेन सर्वेषाम् दैवतानाम् एकात्मकत्वं निरूपितम् ।

अस्य सङ्ग्रहः *श्रीमद्भागवते* यथा –

त्रय्या च विद्यया केचित् त्वां वै वैतानिका द्विजाः । यजन्ते विततैर्यज्ञैर्नानारूपामराख्यया ॥...

त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणम् ।बह्वाचार्यविभेदेन भगवन् समुपासते॥[33] इति ।

श्रीकृष्णं प्रति अक्रूरस्योक्तिरियम् । हे भगवन् वेदत्रय्या ये याज्ञिकाः इन्द्राग्न्यादिनामभिः नानादेवताः यजन्ति ते त्वामेव यजन्ति नान्यं देवम् ।यतो हि ऐन्द्रवारुणादिसूक्तैः इन्द्रादयः सर्वैश्वर्येण प्रकाश्यन्ते । न च सर्वेश्वराः बहवः सम्भवन्ति । अतः नामभेदेन त्वामेव यजन्ति उपासते च इति भावः ॥ एवञ्च स्पष्टमस्य समानार्थकत्वम् ऋङ्मन्त्रेण ।

एवम् *ऋग्वेदे* प्रथममण्डले अस्यवामीयं सूक्तं प्रसिद्धम् |तत्रास्ति प्रसिद्धो मन्त्रः –

---

[32] *ऋग्वेदसंहिता* -६.४७.१८.

[33] *श्रीमद्भागवतम्* गीताप्रेस -१०.४०.५ – ८ पृष्ठम् – ४६६.

द्वा सु॒प॒र्णा स॒युजा॒ सखा॑या समा॒नं वृ॒क्षं परि॑ षस्वजाते ।

तयो॑र॒न्यः पिप्प॑लं स्वा॒द्वत्त्यन॑श्नन्न॒न्यो अ॒भि चा॑कशीति ॥[34] इति ।

अस्य अनुवादः *श्रीमद्भागवते* यथा -

सुपर्णावेतौ सदृशौ सखायौ यदृच्छयैतौ कृतनीडौ च वृक्षे ।

एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोऽपि बलेन भूयान् [35]॥ इति ।

एकादशस्कन्धे उद्धवश्रीकृष्णसंवादे श्रीकृष्णस्योक्तिरियम् ।अत्र लौकिकपक्षिद्वयदृष्टान्तेन जीवपरमात्मानौ स्तूयेते ।यथा लोके द्वौ सुपर्णौ = शोभनगमनौ पक्षिणौ, सयुजा = समानयोगौ (सर्वदा युक्तौ) , सखाया =समानख्यानौ , समानं वृक्षं परिषस्वजाते = एकमेव वृक्षम् आश्रयतः। तयोः अन्यः = एकः पिप्पलं पक्वं स्वादुतरम् अत्ति।अपरः अनश्नन् अभिचाकशीति= अभिपश्यति ।तद्वत् द्वौ सुपर्णस्थानीयौ क्षेत्रज्ञपरमात्मानौ। शरीरं वृक्षस्थानीयम् ।नीडं च हृदयम् । तयोः जीवात्मपरमात्मनोर्मध्ये एकः जीवात्मा पिप्पलान्नम् = शरीरकृतकर्मफलं सुखदुःखादिकम् अत्ति = अनुभवति । अन्यः परमात्मा अनश्नन् केवलं सक्षी सन् पश्यति ।परन्तु अनश्नन्नपि सः निजानन्दतृप्तः बलेन ज्ञानादिशक्त्या भूयान् =अधिकः इत्यर्थः [36]।

शब्दस्वरूपनिरूपणम्

एवम् *ऋग्वेदे* शब्दस्य परादिचातुर्विध्यनिरूपकः अस्ति कश्चन मन्त्रः –

च॒त्वारि॒ वाक्परि॑मिता प॒दानि॒ तानि॑ विदुर्ब्राह्म॒णा ये म॑नी॒षिणः॑।

[34] *ऋग्वेदसंहिता* -१.१६४.२०

[35] श्रीमद्भागवतम् गीताप्रेस - ११.११.६ पृष्ठम् – ५८०.

[36] सायणभाष्यम्

गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति[37]॥ इति।

परा पश्यन्ती मध्यमा वैखरी इति वाचः=शब्दब्रह्मणः चत्वारि परिगणितानि पदानि= रूपाणि । तानि चत्वार्यपि ये मनीषिणः अन्तर्दृष्टयः ते एव विदुः नान्ये । यतो हि तत्र परादीनि त्रीणि गुहायां देहस्य अन्तः निहितानि नेङ्गयन्ति= स्वरूपं न प्रकाशयन्ति ।अतः केवलं वाचः चतुर्थं भागं स्थानप्रयत्नाभ्यां स्पष्टं, वैखरीरूपम् , अन्ये मनुष्याः वदन्ति । तदपि वदन्त्येव न तत्त्वतो जानन्ति इति तदर्थः। मन्त्रस्यास्य सन्त्यनेकानि व्याख्यानानि । तेषु इदमपि अन्यतमम् ।

एतन्मूलकं *श्रीमद्भागवतस्थं* श्लोकद्वयं यथा –

शब्दब्रह्म सुदुर्ज्ञेयं प्राणेन्द्रियमनोमयम् । अनन्तपारं गम्भीरं दुर्विगाह्यं समुद्रवत् ॥[38]

स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः।
मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः ॥[39] इति।

शब्दब्रह्म (वेदः) स्वरूपतः अर्थतश्च सुदुर्ज्ञेयम् । वेदाः ब्रह्मात्मविषयाः 'ब्रह्मैवात्मा न संसारी' इत्येतत्पराः । तत्त्वस्यास्य शुद्धान्तःकरणैरेव ज्ञेयत्वात् अर्थतः दुर्ज्ञेयम् । प्राणेन्द्रियमनोमयम् इत्यनेन परापश्यन्तीमध्यमाख्याः वाचः उच्यन्ते । प्राणमयं (प्राणे आविर्भूतम्) पराख्यम्, मनोमयं पश्यन्त्याख्यम्, इन्द्रियमयं मध्यमाख्यम् (तस्य वाग्व्यञ्जकत्वेन = वैखर्याख्यवाचः प्रकाशकत्वेन वागिन्द्रियप्रधानत्वात् )। एषां सूक्ष्मत्वात् स्वरूपतः दुर्ज्ञेयत्वमुच्यते । वैखरी तु स्थूलरूपा । स एषः अपरोक्षो (जीवयतीति) जीवः=परमेश्वरः विवरेषु आधारादिचक्रेषु अभिव्यक्तिमान् , घोषेण = पराख्येन नादवता प्राणेन सह गुहाम् आधारचक्रं प्रविष्टः सन् मनोमयं सूक्ष्मं रूपं पश्यन्त्याख्यं मध्यमाख्यं च मणिपूरकचक्रे विशुद्धिचक्रे चोपेत्य, वक्त्रे मात्रा = ह्रस्वादिः, स्वरः= उदात्तादिर्वर्णः, ककारादिरित्येवं वैखर्याख्यः अतिस्थूलो नानावेदशाखात्मको भवति इत्यर्थः ।

दिग्दर्शनमेवेदम् । इतोऽपि ऋग्वेदस्य बहवो मन्त्राः दृश्यन्ते *श्रीमद्भागवते* | *पुरुषसूक्तम्* , *विष्णुसूक्तं* च प्रायः संपूर्णम् उपलभ्यते | विस्तरभयात् तत्सर्वं नेह तन्यते |

---

[37] *ऋग्वेदसंहिता* - १.१६४.४५

[38] *श्रीमद्भागवतम्* गीताप्रेस - ११.२१.३६. पृष्ठम् – ५९६-७.

[39] *श्रीमद्भागवतम्* गीताप्रेस -११.१२.१७. पृष्ठम् – ५८२.

## उपसंहारः

*तैत्तिरीयारण्यके* विशेषेण ऋगादितत्तद्वेदाध्ययनस्य फलमुक्तम् - यदृचोऽधीते पयसः कूल्या अस्य पितॄन् स्वधा अभिवहन्ति, यद्यजूँषि घृतस्य कूल्या यत् सामानि सोम एभ्यः पवते, यदथर्वाङ्गिरसो मधोः कूल्या, यद्ब्राह्मणानीतिहासान् पुराणानि कल्पान् गाथा नाराशंसीर्मेदसः कूल्या , अस्य पितॄन् स्वधा अभिवहन्ति ।**.....** त एनं तृप्ता आयुषा तेजसा वर्चसा श्रिया यशसा ब्रह्मवर्चसेनान्नाद्येन च तर्पयन्ति ॥[40] इति ।

कूलम् अर्हन्ति इति कूल्याः महानद्यः। ऋगध्ययनेन क्षीरपूर्णा महानद्यः, स्वधाकारेण दत्तं हविर्भूत्वा पितॄन् अभिलक्ष्य प्रवहन्ति । एवं यजुरध्यनेन घृतपूर्णो महानदीप्रवाहः । सामाध्ययनेन पितृभ्यः सोमो धारया युक्तः प्रवहति। एवम् अथर्वाङ्गिरसामध्ययनेन मधुनद्यः प्रवहन्ति।... एवम् ऋगाद्यध्ययनादिभ्यः क्षीराद्याहुतिसमाना देवानामपि तृप्तिर्भवति । ते च तृप्ताः सन्तः एनं यजमानम् आयुरादिभिः तर्पयन्ति [41] इति तदर्थः ।

अस्यानुवादः *श्रीमद्भागवते* यथा –

ऋचो यजूंषि सामानि द्विजोऽधीत्यानुविन्दते । मधुकुल्या घृतकुल्याः पयःकुल्याश्च तत्फलम् ॥

पुराणसंहितामेतामधीत्य प्रयतो द्विजः । प्रोक्तं भगवता यत्तु तत्पदं परमं व्रजेत् [42]॥

इति ।

एतेन श्लोकद्वयेन वेदाध्यनस्य *तैत्तिरीयारण्यके* यत्फलमुक्तं तदुक्त्वा तदेव फलं श्रीमद्भागवताध्ययनस्यापि वर्तते इत्युच्यते व्यासाचार्यैः । अनेन *श्रीमद्भागवतस्य* वेदात्मकत्वं स्पष्टम् ॥

### ॥इति शम्॥

### उपयुक्तग्रन्थसूची

श्रीशङ्कराचार्यग्रन्थावली - प्रथमो भागः, ईशादिदशोपनिषदः शाङ्करभाष्यसहिताः, (१९६४) प्रथमं संस्करणम्. भारतीयाधिशासनसंरक्षकतायां प्रकाशितम्, मोतिलाल्

40 *तैत्तिरीयारण्यकम्* – २.१०. VOL- I . BY A. MAHADEVA SASTRI, AND PANDITARATNAM K, RANGA CHARYA, पृष्ठम् – २३१-२३२.

41 *सायणभाष्यम्*

42 *श्रीमद्भागवतम्* गीताप्रेस - १२.१२. ६२-६३. पृष्ठम् – ६३५.

बनारसीदास्, दिल्ली वैयाकरणसिद्धान्तकौमुदी – श्रीमद्भट्टोजिदीक्षितप्रणीता ।बालमनोरमा-तत्त्वबोधिनी-लघुशब्देन्दुशेखरसहिता ।
सम्पादकाः- श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो.बालशास्त्री च।
(2012) प्रथमं संस्करणम् । चौखम्बा सुरभारती प्रकाशनम् ,वाराणसी.

पातञ्जलं महाभाष्यम् – श्रीमद्भगवत्पतञ्जलिमुनिविरचितम् । प्रदीपोद्द्योतसहितम् । सम्पादकः - पण्डितश्रीगुरुप्रसादशास्त्री
श्रीगुरुप्रसादशास्त्रिग्रन्थमालायाः प्रथमं पुष्पम् ।(१९८७) द्वितीयं संस्करणम् ।सम्पादकः- डा० बालशास्त्री । वाणीविलास प्रकाशन् , वाराणसी .

तैत्तिरीयारण्यकम् - भट्टभास्करभाष्यसहितम्। VOL- I & II. EDITED BY A. MAHADEVA SASTRI, AND PANDITARATNAM K, RANGA CHARYA, PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJA OF MYSORE, MYSORE. PRINTED AT THE GOVERNMENT BRANCH PRESS. 1900.

ऋग्वेदसंहिता - WITH THE COMMENTARY OF SAYANACHARYA, EDITED BY - 1 PRIN. V. K. RAJWADE, M.A. 2 M. M. VASUDEOSHASTRI ABHYANKAR. 3 MR. N. S.SONTAKKE AND 4 PANDIT T. S. VARADARAJASHARMA, TILAK MAHARASHTRA UNIVERSITY VAIDIC SAMSHODHAN MANDAL (Vedic Research Institute) 1933.

श्रीमद्भागवतमहापुराणम् - महर्षिवेदव्यासप्रणीतम् | स्थूलाक्षरं मूलमात्रम्| गीताप्रेस, गोरखपुर

श्रीमद्भागवतपुराणम् - श्रीव्यासमहर्षिप्रोक्तम्|श्रीधरस्वामिविरचितया भावार्थबोधिनीनाम्यागी संस्कृतटीकया समुपेतम्| संस्कर्ता - आचार्य जगदीशलाल शास्त्री |मोतीलाल बनारसीदास , दिल्ली मुम्बई चेन्नई कलकत्ता बंगलौर वाराणसी पुणे पटना – 1999 .

ब्रह्माण्डमहापुराणम् - डॉ० के० वी० शर्मणा संशोधितम् (तदीयया भूमिकया श्लोकानुक्रमण्या च सहितम्) कृष्णदास संस्कृत सीरीज-४१, कृष्णदास अकादमी, वाराणसी, पुनर्मुद्रितम् - 2000

श्रीमन्महाभारतम् - A New Edition Mainly Based on the South Indian Texts, With Footnotes And Readings. Edited By T. R. Krishnacharya & T. R. Vyasacharya, Proprietors, Madhva Vilas Book Depot, Kumbakonam. Printed At The Javaji Dadaju's "Nirnaya-Sagar" Press. Bombay. 1906.

आश्वलायनगृह्यसूत्रम् - अश्वलायनाचार्यप्रणीतम् ।नारायणकृतवृत्ति- गृह्यपरिशिष्ट-भट्टकुमारिलकारिकासहितम् । वे.शा.सम्. रानडे इत्युपाह्वैः पुरुषोत्तमशास्त्रिभिः संशोधितम्, विनायकगणेश आपटे इत्येतैः प्रकाशितम् - १९३६ आनन्दाश्रमसंस्कृतग्रन्थावलिः -१०५.